कैशोरमा पञ्चदशात् यौवनं तु ततः परमिति" श्रीध-रदर्शिते एकादशावधिपञ्चदशपर्य्यन्तवर्षवयसि "सन्त्वं वयसि कैशोरे भयानुग्रहकारकम्" भाग०३।२८।१८ स्वार्थे क। तत्रार्थे "कैशोरकं मानयन् वै सह नाभिर्मु-मोद ह" हरिवं० ७७ [ ठक्। किशोर्य्या अपत्ये

**कैशोरिकेय** पुंस्त्री० किशोरी+स्वार्थे क ततः शुभ्रा० अपत्ये

**कोक** पुंस्त्री कुक—आदाने अच्। १चक्रवाके "हंसारवैः कोकरवैश्च" भा० आनु० २६अ० "विरहविधुरकोकद्वन्द्व-शोकं विभिन्दन्" उद्भटः। २वृके "वने यूथपरिभ्रष्टा मृगी कोकैः (वृकैः) रिवार्द्दिता" रामा०। ३भेके च स्त्रियां ङीप्। ४ज्येष्ठ्याम् (टिकटिकी) ५खर्ज्जूरी वृक्षे च पु० मेदि० ६विष्णौ पु० त्रिका०

**कोकड** पुंस्त्री कोकं तद्रवं लाति ला—क लस्य डः। विलेशय-मृगभेदे चमरमृगे राजनि० स्त्रियां ङीष्।

**कोकदेव** पुंस्त्री कोकइव दीव्यति दिव—अच्। कपोते राजनि०

**कोकनद** न० कोकान् चक्रवाकान् नदति नादयति अन्तर्भूत-ण्यर्थे नद—अच्। १रक्तकुमुदे, २रक्तपद्मे च। "व्याकोश-कोकनदतां दधते नलिन्यः" माघः। "सरसः कोक-नदभ्रमादिव" नैष०

**कोकनदच्छवि** पु० कोकनदस्य छविरिव छविर्द्यस्य। १रक्तवर्णे २तद्वति त्रि० अमरः। [ स्वर्य्ये शब्दच०।

**कोकबन्धु** पु० कोकयोश्चक्रवाकयोर्मेलनकारित्वात् बन्धुरिव।

**कोकरक** पु० ब०व० देशभेदे। "वृकाः कोकरकाः प्रोष्ठाः सम-वेगवशास्तथा" भा० भी० ६ देशकथने।

**कोकवाच** पुंस्त्री कोकस्य वाचेव वाचा वाक् रवोयस्य। विलेशयमृगभेदे राजनि०

**कोकाख्य** पु० कोकस्येवाख्यास्य। समष्ठिलक्षुपभेदे राजनि०

**कोकामुख** न० भारतप्रसिद्धे तीर्थभेदे "कोकामुखमुपस्पृश्य ब्रह्मचारी यतव्रतः। जातिस्मरत्वमाप्नोति दृष्टमेतत् पुरातनैः" भा० व०८४अ० "कोकामुखे विगाह्याथ" भा० आनु०। २५अ०

**कोकाह** पु० कोकइवाहन्ति आ+हन—ड। श्वेताश्वे हेमच०

**कोकिल** पुंस्त्री कुक—इलच्। स्वनामख्याते पक्षिणि अमरः। "पुंस्कोकिलो यन्मधुरं चुकूज" कुमा०। स्त्रियाम् जाति-त्वेऽपि—अजा० टाप्। "कोकिलाकलरवो वनेवने नून-मत्र निगडो भविष्यति" उद्भटः। "अवकूजः कोकि-ति" सि० कौ० "रतिदूतिपदेषु कोकिलाम्" कुमा० "कोकिलामञ्जुवादिनीम्" रघुः। अङ्गारे पु० त्रिका० संज्ञायां कन्। "इयदशभिर्नजौ भजजला गुरु नर्द्द-टकम्। मुनिगुहकार्णवैः कृतयति वद कोकिलकम्" वृ० र० उक्ते २छन्दोभेदे न०।

**कोकिलनयन** पु० कोकिलस्य नयनमिव रक्तं पुष्पमस्य। अतिरक्तपुष्पे (तालमाखना) (कुलेखाड़ा) वृक्षभेदे रमा-नाथः [ (तालमाखना) वृक्षभेदे अमरः

**कोकिलाक्ष** पु० कोकिलस्याक्षीव रक्तं पुष्पमस्य पचसमा०।

**कोकिलावास** पु० ६त०। आम्रवृक्षे राजनि०

**कोकिलासन** न० रुद्रयामलोक्ते आसनभेदे तल्लक्षणम् यथा "अथान्यदासनं वक्ष्ये येन सिद्धो भवेन्नरः। निरुन्ध्याद्-वायुसञ्चारं कोकिलाख्यासनेन च। ऊर्द्ध्वे हस्तद्वयं कृत्वा तदग्रे पादयोः सुधीः। बद्धाङ्गुष्ठद्वयं नाथ! शनैः शनैः प्रकारयेत्। पद्मासनं समाकृत्य कूर्परोपरि संस्थितः"

**कोकिलेक्षु** पु० कोकिल इव कृष्णः इक्षुः। (काजला)इक्षु-भेदे। राजनि०

**कोकिलेष्टा** स्त्री०६त०। महाजम्बूवृक्षे राजनि०

**कोकिलोत्सव** पु० कोकिलानामुत्सवोऽत्र। आम्रवृक्षे राजनि० [ (टेशान्) भाग० ५।६।८

**कोङ्क** पु० ब०व०। देशभेदे। "संक्रमाण कोङ्कवेङ्कटकान्"

**कोङ्कण** पु० ब०व०। देशभेदे स च देशः वृ० सं० कूर्मविभागे दक्षिणस्यामुक्तः "शिबिकफणिकारकोङ्कणाभीराः"। "अथापरे जनपदा दक्षिणा भरतर्षभ!। कौकुट्टकास्तथा चोलाः कोङ्कणा मलवानराः" भा० भी० ६अ०। क्वचि-देकत्वम् "नाथ वर्ज्यः कोङ्कणे मागधे च" मु० चि० "मालवे गौडदेशे च सिन्धुदेशे च कोङ्कणे। व्रतं चूडां विवाहञ्च वर्ज्जयेन्मकरे गुरौ" ज्यो० भा०। तेषां राजा अण्। कौङ्कण तद्देशभवे बहुषु तस्य लुक्। तत्रार्थे स्वार्थे क "कुन्तलांश्च तथा वङ्गान् शाल्वान् कोङ्कणकां-स्तथा (विजित्य) हरिवं० १४अ०

**कोङ्कणासुत** पु० कोङ्कणदेशोद्भवा अण् तस्य लुक् कोङ्कणा रेणुका ६त०। परशुरामे शब्दमा०

**कोच** त्रि० कुच—ज्वला० कर्त्तरि ण। १सङ्कोचके, । भावे घञ्। २सङ्कोचे "एकैकस्य त्वकोचभेदस्यपनाङ्कसादाः कुष्ठे महत्पूर्वयुते भवन्ति" सुश्रु० ब्रह्मवै०पु० उक्ते ३जातिभेदे (कोँच) "तीवरश्चैव स एतः मांसच्छेदिसमुद्भवः। कोचजातिरिति ख्याति तत्रोक्ताः। स्त्रियां ङीष्। ४तत्-प्रधाने देशे पु०। सोऽभिजनोऽस्य अण्। कौच तद्देश-वासिनि बहुषु तस्य अणोलुक्।